मृगारिः, पुं, (मृगाणामरिः।) सिंहः। व्याघ्रः। इति मेदिनी। रे, २०६। कुक्कुरः। रक्तशिग्रुः। इति राजनिर्घण्टः॥

मृगावित्, [ध्] पुं, (मृगान् विध्यति इति। व्यध + क्विप्। "अन्येषामपि दृश्यते।" ६। ३। १३७। इति दीर्घश्च।) व्याधः। इति जटाधरः॥ (मृगावेधनशीलः। यथा, भट्टिकाव्ये।५।८२।
"भ्रातरि न्यस्य यातो मां मृगाविन् मृगयामसौ।")

मृगितः, त्रि, (मृग + क्तः।) अन्वेषितः। इत्यमरः॥

मृगी, स्त्री, (मृग + जातौ ङीष्।) मृगजातिस्त्री। इति व्याकरणम्॥ (यथाभिज्ञानशाकुन्तले।६।
"शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥")
अस्या दुग्धगुणाः छागीदुग्धगुणतुल्याः। यथा,
'मृगीणां जाङ्गलोत्थानां व्यजाक्षीरगुणं पयः।'
इति भावप्रकाशः॥
पुलहभार्य्या। सा कश्यपकन्या। तस्या अपत्यं हरिणादि। यथा,—
"क्रोधायाः जज्ञिरे कन्या द्वादशैवात्मसम्भवाः।
ता भार्य्याः पुलहस्य स्युर्मृगी मन्दा इरावती॥
भूता च कपिला दंष्ट्रा कषा तिष्या तथैव च।
श्वेता च सरमा चैव सरसा चेति विश्रुताः॥
मृग्यास्तु हरिणाः पुत्त्रा मृगाश्चान्ये शशास्तथा।
न्यङ्कवः शरभा ये च पृषताश्च ये॥"
इति वह्निपुराणम्॥
चतुरक्षरच्छन्दोविशेषः। यथा। रो मृगी। 'सा मृगीलोचना। राधिका श्रीपतेः॥' इत्यादि। इति छन्दोमञ्जरी॥ अपस्माररोगः। इति लोके ख्यातः॥ (होमोक्तमुद्राविशेषः॥)

मृगेक्षणा, स्त्री, (मृगैरीक्ष्यते प्रियत्वात् इति। ईक्ष् + ल्युट् + स्त्रियां टाप्।) मृगेर्व्वारुः। इति राजनिर्घण्टः॥ मृगनयना स्त्री च॥ (यथा, हरिवंशे हितायाम्। ४८। १४।
"काञ्चीकलापनूपुरगुणबलघनोद्दहनविश्रितपराभिः।
श्रीमति मृगेक्षणाभिर्गृहैरन्यभ्रतवधूयुवचनाभिः॥")

मृगेन्द्रः, पुं, (मृगाणामिन्द्रः श्रेष्ठः।) सिंहः। इत्यमरः। २। ५। १॥ (यथा, श्रीमद्भागवते। १। १२। २२।
"मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव।
तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव॥"
भगवद्विभूतिः। यथा, श्रीमद्भगवद्गीतायाम्। १०। ३०।
"मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥"
छन्दोविशेषश्च॥)

मृगेन्द्रचटकः, पुं, (मृगेन्द्र इव विक्रमी चटकः।) श्येनपक्षी। इति जटाधरः॥

मृगेन्द्राणी, स्त्री, (मृगेन्द्रेण अद्यते इति। अद् + घञ् + गौरादित्वात् ङीष्।) वासकः। इति राजनिर्घण्टः॥ (विशेषोऽस्या वासकशब्दे ज्ञातव्यः॥)

मृगेर्व्वारुः, स्त्री, (मृगस्य प्रिया इर्व्वारुः।) श्वेतेन्द्रवारुणी। सँधिनी इति हिन्दीभाषा॥ तत्पर्य्यायः। मृगाक्षी २ श्वेतपुष्पा ३ मृगादनी ४ चित्रवल्ली ५ बहुफला ६ कपिलाक्षी ७ मृगेक्षणा ८ चित्रा ९ चित्रफला १० पथ्या ११ विचित्रा १२ मृगचिर्भिटा १३ मरुजा १४ कुम्भिनी १५ देवी १६ कटुफला १७ लघुचिर्भिटा १८। अस्या गुणाः। दुर्जरत्वम्। गुरुत्वम्। मन्दानलकारित्वम्। रक्तपित्तहारित्वञ्च। इति राजनिर्घण्टः॥

मृगेशः, पुं, (मृगाणामीशः।) सुगरवृक्षः। इति राजनिर्घण्टः॥

मृग्यः, त्रि, (मृग्यते अन्विष्यते असौ। मृग् + कर्म्मणि यत्।) मृगितव्यः। अन्वेषणीयः। इति व्याकरणम्॥ (यथा, श्रीमद्भागवते। ७। ७। २३।
"देहस्तु सर्व्वसंघातो जगत्तस्थुरिति द्विधा।
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन्॥")

मृज ऊ ष कि भूषे। शुद्धौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ऊ अमार्जीत् अमार्क्षीत्। ष मृजा। कि मार्ज्जयालेपनैर्द्विजान्। यो मार्ज्जयति शास्त्रार्थमिति हलायुधः। इति दुर्गादासः॥

मृज ल ऊ ष शुद्धौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च। ल मार्ष्टि तीर्थोदकैर्नित्यमिति हलायुधः। ऊ अमार्ज्जीत् अमार्क्षीत् मलम्। व्यमार्क्षीवासि पयादीनिति भट्टिः। ष मृजा। इति दुर्गादासः॥

मृजः, पुं, (मृज्यतेऽसौ। इति मृज् + कृत्यल्युटो बहुलमिति कर्म्मणि कः।) वाद्यविशेषः। मादल इति भाषा। यथा। मर्द्दलो दारजो मृजः। इति शब्दरत्नावली॥

मृजा, स्त्री, (मृज्यते इति। मृज् + "षिद्भिदादिभ्योऽङ्।" ३। ३। १०४। इति अङ् + टाप् च।) मार्ज्जनम्। इत्यमरः। २।६।१२१॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
"अभ्यङ्गो मार्द्दवकरः कफवातनिरोधनः।
धातूनां पुष्टिजननो मृजावर्णबलप्रदः॥")

मृज्यं, त्रि, मृज्यते यत् इति। मृज्। "मृजेर्विभाषा।" ३। १। ११३। इति क्यप्।) मार्ग्यम्। मार्ज्जनीयम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टौ। ६। ५६।
"मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च तेन ते॥")

मृड ग श मोदे। इति कविकल्पद्रुमः॥ (क्र्या०-वा तुदा०-अक०-सेट्।) मोद इह सुखीकरणम्॥ ग मृड्णाति सरस्वत्या च यः सदेति हलायुधः। श मृडति दीनं दाता। अमृडिता सहस्राक्षमिति भट्टिः। मर्डिता। इति दुर्गादासः॥

मृडः, पुं, (मृडति सुख्यतीति। मृड् + इगुपधत्वात् कर्त्तरि कः।) शिवः। इत्यमरः। १। १। ३३॥ (यथा, श्रीमद्भागवते। ४। २। ७।
"प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः॥")

मृडङ्कुणः, पुं, (मृडयति सुखयतीति। मृड् + "मृडः कीकन् कंकणौ।" उणा० ४। २४। इति कंकणः।) बालकः। इत्युणादिकोषः॥

मृडा, मृडी, } स्त्री, (मृड + टाप् ङीप् च।) दुर्गा। इति हलायुधः॥

मृडीकः, पुं, (मृडतीति। मृड् + "मृडः कीकन् कङ्कणौ।" उणा० ४। २४। इति कीकन्।) हरिणः॥

मृण, श हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मृणति। इति दुर्गादासः॥

मृणालं, क्ली, पुं, मृण्यते हिंस्यते भक्षणार्थं यत्। (मृण् + "तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्।" उणा० १। ११७। इति कालन्।) पद्मादीनां नालम्।) मोलाम इति ख्यातम्। इति भरतः॥ (यथा, नैषधचरिते। १। १३७।
"मदर्थसन्देशमृणालमन्थरः
प्रियः कियद्दूर इति त्वयोदिते॥")
तत्पर्य्यायः। बिसम् २। इत्यमरः।१।१०।४२॥ बिशम् ३। इति द्विरूपकोषः॥ पद्मनालम् ४ मृणाली ५ मृणालिनी ६ पद्मतन्तुः ७ बिसिनी ८ नलिनीरुहम् ९। अस्य गुणाः। शिशिरत्वम्। तिक्तत्वम्। कषायत्वम्। पित्तदाहमूत्रकृच्छ्रविकाररक्तवान्तिहरत्वञ्च। इति राजनिर्घण्टः॥ (शालूकविशेषः। तत्पर्य्यायो यथा,
"पद्मादिकन्दः शालूकं करहाटश्च कथ्यते।
मृणालं मूलं भिशाण्डं लब्धाम्बुकश्च कथ्यते॥"
तथास्य गुणाः। बिसार्थे शालूकार्थे च॥
"मृणालं शीतलं वृष्यं पित्तदाहास्रजिद्गुरु॥
दुर्ज्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्।
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृणालं, क्ली, (मृण + कालन्।) वीरणमूलम्। इति मेदिनी। ले, १२४॥ (अस्य पर्य्यायो यथा,
मृणालमभयं सेव्यं लामज्जकसुशीरकम्॥"
इति वैद्यकरत्नमालायाम्॥
"स्वादुशीरं मृणालञ्च सेव्यं लामज्जकन्तथा॥"
इति गारुडे पूर्व्वखण्डे २०८ अः॥)

मृणालिनी, स्त्री, (मृणालानि अस्याः सन्तीति। मृणाल + "पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप् च।) पद्मिनी। इति जटाधरः॥ सा तु पद्मयुक्तदेशः पद्मसमूहः पद्मलता च॥ (यथा, रघुवंशे। १६। ७।
"बिभर्षि चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम्॥")